International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 188-196
© 2019 IJSR
www.anantaajournal.com
Received: 11-07-2019
Accepted: 15-08-2019

**Dr. Pramod Bhat**
Dept. of Navya Vyakarana
Rashtriya Sanskrit Sansthan
Rajiv Gandhi Campus, Sringeri,
Karnataka, India

**Corresponding Author:**
**Dr. Pramod Bhat**
Dept. of Navya Vyakarana
Rashtriya Sanskrit Sansthan
Rajiv Gandhi Campus, Sringeri,
Karnataka, India

# ब्रह्माण्डपुराणे श्राद्धकल्प

Dr. Pramod Bhat

## शोधसार

भारतीयसनातनसंस्कृते: मूलाधारा: वर्तन्ते चत्वारो वेदा: । ते मानवकुलश्रेयसे मार्गदर्शका: भवन्ति । अपौरुषेयत्त्वाच्च ते परमपवित्रास्सन्ति । अतीन्द्रियविषये वेदा: प्रमाणम् । सम्प्रत्यस्माभि: यदनुभूयते सुखं दु:खं वा तयो: कारणीभूतं विद्यते गतजन्मन: पुण्यं पापं वा । अत: सुखप्राप्तये दु:खनिवृत्तये च मानवै: पुण्यसम्पादनमवश्यमेव कर्तव्यम् इति वेदा:, शास्त्राणि, पुराणानि, इतिहासाश्चोपदिशन्त्यस्मान् । पुण्यसम्पादनायानेके मार्गा: अनेकविधकर्तव्यकर्माणि तैरुपदिष्टानि सन्ति । तानि चावश्यकर्तव्यानि कर्माणि मुख्यतया त्रिधा विभक्तानि । नित्यकर्माणि, नैमित्तिककर्माणि, काम्यकर्माणि चेति । नित्यकर्मण:, नैमित्तिककर्मणश्च पापपरिहार एव फलम् । विहिते देशे विहिते कालेऽवश्यं कर्तव्यं कर्म नित्यकर्मेत्युच्यते । तद्यदि न क्रियते तर्हि पापाय । नित्यकर्माणि यथा संध्योपासनम्, अग्निकार्यम्, अग्निहोत्रादीनि, तथैवाधिकारिभ्य: श्राद्धकर्म । नित्यकर्मेत्युक्ते प्रतिदिनं कर्तव्यकर्म इत्येव न किन्तु विहितकाले कर्तव्यमपि कर्म नित्यकर्मेत्युच्यते । तद्यदि न क्रियते तर्हि प्रत्यवाय: । एतेषु कर्मसु श्राद्धकर्म अन्यतमं भवति ।

श्राद्धमिति पारिभाषिकं पदम् । "श्रद्धया दीयते यस्मात्" इति व्युत्पत्त्या श्रौतस्मार्तादीनि सर्वाण्यपि कर्माणि श्रद्धयैव क्रियन्ते चेदपि दानादिसर्वं कर्म श्राद्धमिति न व्यवह्रियते । श्रद्धा इति सर्वश्रौतस्मार्तादिवैदिककर्मसु अवश्यं भवेदेव अत: श्रद्धा श्रौतस्मार्तादिकर्मण: अङ्गं भवति । धर्मशास्त्रे तु श्राद्धसामन्यलक्षणं तु इत्थं प्रतिपादितं वर्तते यत् "पित्रादीन् मृतान् उद्दिश्य विहिते काले देशे पक्वान्नामान्नहिरण्यान्यतमद्रव्यस्य विधिना दानं श्राद्धमिति" । श्राद्धे प्रधानतया त्रय:

विभागास्सन्ति यथा १. अग्नौकरणम्, २. पिण्डप्रदानम्, ३. ब्राह्मणभोजनमिति । प्रदर्शितश्राद्धत्रयमपि कर्तुमसमर्थश्चेदपि अधिकारी शास्त्रोक्तरीत्या केवलब्राह्मणभोजनं वा कुर्याच्चेदपि श्राद्धमेव भवति तत् । तथा हि उक्तं शास्त्रकारै:

होमश्च पिण्डदानश्च तथा ब्राह्मणभोजनम् ।
श्राद्धशब्दाभिधेयं स्यात् एकस्मिन्नौपचारिकम् ॥ इति ॥ (धर्मसिन्धुः)

श्राद्धं प्रधानतया चतुर्धा विभक्तम् । १. पार्वणश्राद्धम्, २. एकोद्दिष्टश्राद्धम्, ३. नान्दीश्राद्धम्, ४. सपिण्डीकरणश्राद्धमिति ।

**पार्वणश्राद्धम्** –
"पित्रादित्रयोद्देशेन विहितं पिण्डत्रययुतं पार्वणम्", अर्थात् पिता, पितामहः, प्रपितामहः अथवा माता, पितामही, प्रपितामही इत्येतान् त्रीन् उद्दिश्य पिण्डप्रदानं यत्र क्रियते तत्पार्वणश्राद्धमित्युच्यते । सपिण्डीकरणानन्तरं मासिकश्राद्धम् एवं प्रतिवर्षं मृततिथौ क्रियमाणं सांवत्सरिकश्राद्धमपि पार्वणश्राद्धविधावेव अन्तर्भवति ।

**एकोद्दिष्टश्राद्धम्** –
"एकोद्देशेन क्रियमाणम् एकपिण्डयुतं श्राद्धम् एकोद्दिष्टश्राद्धमिति", अर्थात् केवलमृतजीवम् उद्दिश्य एकमेव पिण्डप्रदानं यत्र क्रियते तदेकोद्दिष्टश्राद्धमित्युच्यते । मृततिथिमारभ्य एकादशदिनपर्यन्तं क्रियमाणं श्राद्धम् अर्थात् सपिण्डीकरणात् प्राक् क्रियमाणं मासिकश्राद्धम् एकोद्दिष्टश्राद्धम् ।

**नान्दीश्राद्धम्** –
"पुत्रजन्मविवाहादौ क्रियमाणं वृद्धिश्राद्धं नान्दीश्राद्धमिति" अर्थात्, पुत्रजन्मनि, उपनयनविवाहादौ क्रियमाणं श्राद्धं नान्दीश्राद्धम् । एतत् पुत्रजन्मादिमङ्गलकार्यारम्भे पितृगणमुद्दिश्य तेषामाशीर्वादप्राप्यर्थं क्रियमाणपूजादिविधिरेव नान्दीश्राद्धम् । नान्दीसमाराधाना इति नान्दीश्राद्धस्यापरन्नाम ।

**सपिण्डीकरणश्राद्धम्** –
"मृतस्य द्वादशाहादिकाले पिण्डार्घ्यासंयोजनादिरूपं सपिण्डीकरणम्", अर्थात् मृतजीवं पितृगणे विधिवत्संयोजनमेव सपिण्डीकरणमित्युच्यते । मृतदिनात् द्वादशदिने, सार्धैकमासि, अष्टममासि, दशममासि वर्षान्ते वा सपिण्डीकरणश्राद्धं कर्तुं शक्यते इति अनेके कालाः निर्दिष्टाः दृश्यते ।

पुत्रादिभिः मातापितृमृततिथौ तावुद्दिश्य क्रियमाणं श्राद्धं पुत्रेभ्यः नित्यं कर्म । यदि न क्रियते तर्हि प्रत्यवायः । अतः श्राद्धाधिकारिभिः स्वपित्रादिकर्म स्वशक्त्यनुसारं कर्तव्यमेव । ये मातृपित्रादयः मृताः तान् उद्दिश्य श्राद्धं कर्म कर्तव्यमिति श्रद्धया श्राद्धं क्रियते पुत्रादिभिः । श्राद्धसमये अधिकारिभिः यद्दीयते पितृन् उद्दिश्य पिण्डतिलोदकादि तत्सर्वं किं पितरः स्वीकुर्वन्ति, यतो हि मरणानन्तरं ते स्वपूर्वशरीरं त्यक्त्वा अर्जितपुण्यपापाद्यनुगुणं पितृलोके वसेयुः, अथवा पशुपक्षिमनुष्यदेवादिशरीरं वा प्राप्नुयुः अतः श्राद्धकरणेन किं प्रयोजनम् इति चेत् स्मृतिपुराणेतिहासादिषु श्राद्धस्य उद्देशफलादिनिरूपणावसरे प्रसङ्गात् उक्तं यत् अधिकारिभिः पितृन् उद्दिश्य श्राद्धकाले नामगोत्रमन्त्रादि यदुच्चार्य हविःपिण्डजलतिलादिदानं कृतं तान्यवश्यमेव तत्तत्पितरः स्वीकुर्वन्त्येव इति । तत्कथमिति चेत् पित्रादयः देवतास्वरूपं प्रापुः यदि, तर्हि तत् पुत्रदत्ते पिण्डान्नजलादि अमृतस्वरूपेण पितृन् प्राप्नोति । यदि पशुरूपशरीरं प्राप्तवन्तः स्युः तत्तृणरूपेण पितृन् प्राप्नोति, यदि सर्पशरीरं प्राप्तवन्तः तर्हि वायुरूपेण, यदि राक्षसादिशरीरं तदा मांसरूपेण, यदि मनुष्यशरीरं तर्हि अन्नादिरूपेण ते स्वीकुर्वन्ति । श्राद्धदिनं यदि सन्निहितं तर्हि मनोवेगेन पितरः आगत्य वायुरूपेणोपस्थाय आवाहितब्राह्मणैस्सह भुज्यन्ते । तथा चोक्तम्

तस्य ते पितरश्श्रुत्त्वा श्राद्धकालमुपस्थितम् ।
अन्योऽन्यं मनसा ध्यात्त्वा संपतन्ति मनोजवाः ।
तैः ब्राह्मणैः सहाश्नन्ति पितरो वायुरूपिणः ॥ इति ॥ (धर्मसिन्धुः)

श्राद्धार्थं यदि ब्राह्मणाः न लब्धाः तदा दर्भेषु ब्राह्मणम् आमन्त्रयित्त्वा पिण्डं दद्यात् । श्राद्धोपयुक्तपदार्थाः न लब्धाश्चेत् पक्वान्नेन

पितृसूक्तद्वारा होमं कुर्यात् । पुनः इतोऽप्यशक्तश्चेत् श्राद्धदिने त्यक्ताहारः भूत्वा ब्राह्मणेभ्यः किञ्चिद्धिरण्यं, धान्यं, तिलमथवा जलपात्रं दद्यात् । तत्राप्यशक्तश्चेत् गोभ्यः आहाररूपेण तृणं दद्यात् । तृणमप्यलब्धं यदि एकमुष्टितृणं राशीकृत्य भस्मसात् कुर्यात् । अथवा संकल्पादिकं कृत्त्वा सम्पूर्णश्राद्धप्रयोगं पठेदधिकारी । सर्वाभावे अरण्यं गत्त्वा हस्तद्वयम् उपरि उत्थाप्य

न मेऽस्ति वित्तं न धनं न च अन्यत् ।
श्राद्धोपयोगी स्वपितॄन् नतोऽस्मि ॥
तृप्यन्तु भक्त्या पितरो मयैतौ ।
भुजौ कृतौ वर्त्मनि मारुतस्य ॥ (निर्णयसिन्धुः-द्वितीयपरिच्छेदः)

एतच्छ्लोकं पठित्त्वा अन्तःकरणपूर्वकं पितॄन् स्मृत्त्वा रोदनश्राद्धमाचरेत् । एतत्सर्वमापत्पक्षे एव । एवञ्चेत्थं श्राद्धकर्म न कदापि त्यजेत् अधिकारी ।

मनुष्यलोके यच्चान्द्रमानमेकवर्षं तत् पितृणाम् एकं दिनम् । अतः इहैकं वर्षं श्राद्धं कृत्त्वा पितृभ्यः आहारं यदि समर्पयति तर्हि पितृलोके एकं दिनं पितृभ्यः आहारं दत्तं भवति । अधिकारी मृतपित्रोः श्राद्धं यथा मृततिथौ करोति तद्वत् वर्षे षण्णवतिकृत्त्वः नित्यकर्मरूपेण श्राद्धमाचरेत् । तानि १२ संक्रान्तिश्राद्धानि, १२ अमावास्याश्राद्धानि, १६ महालयश्राद्धानि, १४ मन्वन्तरश्राद्धानि, १२ अष्टकाश्राद्धानि, ४ युगादिश्राद्धानि, १३ व्यतीपातश्राद्धानि, १३ वैधृतिश्राद्धानि आहत्य षण्णवतिश्राद्धानि सन्ति । एतेषु सामान्यतया श्राद्धप्रतिनिधिरूपेण तिलतर्पणं वा कर्तव्यमिति शिष्टसम्प्रदायः । श्राद्धाचरणं न केवलं पुत्रादीनां कर्तव्यमेव न, अपि तु पुत्राः भूत्त्वा पित्रोः सेवापि । पितृऋणात् मुक्तो भवितुमपि श्राद्धाचरणम् एकमङ्गम् । श्राद्धदिने पितरः वायुशरीरिणः भूत्वा गृहमागच्छन्ति । यदि पुत्रैः श्राद्धाचरणं न क्रियते तर्हि शापं दत्त्वा निर्गच्छन्ति । अतः अधिकारी श्राद्धं समाचर्य पितॄन् सन्तोषयेत् । तदुक्तम्

श्राद्धाभावे स्वभवनं शापं दत्त्वा व्रजन्ति ते ।
अतो मूलैः फलैर्वापि तथाप्युदकतर्पणैः ।
पितृतृप्तिं प्रकुर्वीत नैव श्राद्धं विवर्जयेत् ॥ इति ॥
(निर्णयसिन्धुः-द्वितीयपरिच्छेदः)

सर्वे जन्तवः सुखापेक्षिणः । सुखप्राप्तये मनुष्यप्रयत्नेन सह दैवानुग्रहोऽपि आवश्यकः । विना दैवानुग्रहं पुरुषप्रयत्नः अफलो भवति । देवतार्चनकर्मभिः दैवानुग्रहः अत्यावश्यकः इति वेद एव वदति, तथा हि "देवा अवन्तु शोभायै पितरोऽनुमदन्तु" इति ।

**ब्रह्माण्डपुराणे श्राद्धकल्पः**

योगात्मानः, महात्मानः, विपाप्मानः, महौजसः, पितरः अव्ययाः सकृदभ्यर्चिताः अपि प्रीताः भवन्ति । अमरकण्टके पूर्वकाले अङ्गिरोमुनिः अयतान्यर्बुदानि वर्षसहस्राणि तपश्चकार । त्रिषु लोकेषु पुण्यप्रदः, पर्वतप्रवरः, सिद्धचरणसेवितश्च सः देशः । तत्रासुराणां, राक्षसानां मृत्योः अपि गतिर्नास्ति । अपि चात्र भयादिविषये अवसर एव नास्ति । तत्र दक्षिणदिग्भागे कान्तियुता दर्शनीयमानिनी नर्मदानदी प्रवहति । तत्र ये कुशाख्याः दर्भाः प्रसिद्धाः तान् प्रस्तराख्यदर्भान् अङ्गिरोमुनिः अग्निहोत्रकर्मणि प्रायुङ्क्त ।तत्रत्यदर्भोपयोगः स्वर्गसोपानमिति ज्ञातवान् ।अतः ज्ञानी नरः अमरकण्टके दर्भाणामुपरि पितॄन् उद्दिश्य यदि पिण्डप्रदानं करोति तदुपरि पितरः अक्षय्यप्रीतिमनुभवन्ति । एतत्क्षेत्रमहिमाविषये शुक्रः एवमाह –

धन्यास्ते पुरुषा लोके ये प्राप्यामरकण्टकम् ।
पितॄन् सन्तर्पयिष्यन्ति श्राद्धे पितृपरायणाः ॥
अल्पेन तपसा सिद्धिं गमिष्यन्ति न संशयः ।
सकृद्देवार्चितास्तत्र स्वर्गममरकण्टके ॥ इति ॥

शक्रनिषेवितः पुण्यरम्यमहेन्द्रपर्वतः तत्रारुह्य श्राद्धकरणेन पूतत्त्वं महापुण्यफलत्वञ्चानुभवति । बैलाटपर्वते श्राद्धचरणेन दिव्यदृष्टिं

प्राप्नोति । सर्वप्राणिभ्यश्च अजेयो भवति । भूते च देवव्चरितुं शक्नोति । सप्तगोदावरे गोकर्णक्षेत्रे च पवित्रतपोवने तीर्थस्नानं कृत्वा सत्पात्रेभ्य: श्राद्धसम्बन्धिदानकर्माचरणेन अश्वमेधयज्ञफलं भुङ्क्ते । यत्र महेश्वर: साक्षात् तपश्चकार धूतपाख्ये स्थाने तत्र श्राद्धचरणेन नर: पूतो भवति । ताम्रपर्णीनदीतटे श्राद्धाचरणेन आदिव्याधिभिर्मुक्तो भूत्वा अमरावतीं याति । तत्र चन्दनेभ्य: प्रसूतानां शाखानां मौक्तिकानां केवलस्पर्शमात्रेण पितृन् अपि तारयति । चन्द्रतीर्थे, कावेरीनद्यां श्रीपर्वते, वैकृतगिरौ, यत्र पलाशखादिरबिल्वप्लक्षाश्वत्थविकङ्कतवृक्षा: एकत्रीभूय भासन्ते तत्र श्राद्धाचरणं श्रेष्ठमिति कथ्यते । तत्र येषां मरणं च भवति ते यथाशीघ्रममरावत्याख्यमिन्द्रपुरं प्राप्नुयु: । पर्वततीर्थसन्निधौ वैकृतगिरौ च कृतानुष्ठानकर्मणि प्रलयकालेऽपि सिद्धिं यान्ति । पितृणां मानसकन्या नर्मदा इति प्रसिद्धा तत्र क्रियमाणश्राद्धेन अक्षय्यफलमनुभवति । सिद्धचारणै: सेवित: माठरपर्वत: महापवित्र: तत्र धर्माचरणेन अन्तर्धानशक्तिं चानुभवति । कैलासपर्वते मातङ्गमुनिसम्बन्धी पापध्वंसक: एक: कूप: प्रसिद्ध: वर्तते तत्र केवलस्नानकरणेनैव स्वेच्छाचारा:, गगनचरा: भवन्ति । शौर्पारकाख्यतीर्थक्षेत्रे, पालमञ्जराख्यपर्वते, पाण्डुकूपे, पिण्डारकाख्ये तटे श्राद्धचरणार्थम् उत्तमक्षेत्रं वर्तते । तत्रैव श्रीवृक्षे, चित्रकूटे जम्बूमार्गे च क्रियमाणश्राद्धकर्माणि अक्षय्यफलदातृणि भवन्ति । असितनदीतटे अनन्तफलावाप्तिश्च भवति ।

एवमेव पुष्करक्षेत्रे, महोदधौ प्रभासक्षेत्रे देविकानदीतटे श्राद्धाचरणेन महत्पुण्यं लभ्यते । योगेश्वरै: सेवित: कूप: वृषकूप: इति नाम्ना प्रसिद्ध: । समस्तपापदूषक: स: कूप: । तत्र श्राद्धान्नदानेन सर्वकामान् अवाप्नोति । तत्र जातवेदा आख्यैका शिला वर्तते । श्राद्धकर्म एवं अग्निकार्यं च तत्र शिलासमीपे करणेन अक्षय्यफलं प्राप्नोति । तत्र स्थाने कृताग्निप्रवेश: पुरुष: स्वर्गलोके आनन्दते । तत्र अग्नि: शान्तो भूत्वा पुन: जात इति कृत्वा तत्र कृतदानकर्मणा अनन्तफलं प्राप्नोति । दशाश्वमेधे, पञ्चाश्वमेधतीर्थे च कृतं दानमश्वमेधयागफलं प्राप्नोति । हयशिराख्येन प्रसिद्धे तीर्थक्षेत्रे शीघ्रं वरं प्राप्नोति । तत्र य: श्राद्धान्नं ददाति स: स्वर्गे नन्दति । सुन्दनिसुन्दक्षेत्रे श्राद्धचरणेन पापनाश: भवति । अजतुङ्गतीर्थक्षेत्रे पितृन् सर्वदा तर्पयेत् । पर्वकाले देवानां छाया सर्वदा तत्र दृश्यते । विरजाख्यवृक्षेण विभूषितं क्षेत्रं पार्थिवाख्यं तत्र श्राद्धचरणेन श्राद्धदानफलमक्षय्यं भवति । स: वृक्ष: योगेश्वरै: सेवित: । तत्र क्षेत्रे मद्रवाख्या पवित्रनदीप्रसिद्धा वर्तते । तत्सम्बन्धी शिवाख्यजलाशयोऽपि तत्र वर्तते । अत: अधिकारी जितेन्द्रियस्सन् तत्र पितृकार्यकरणेन पितर: प्रत्यक्षरूपेण पूजिता भवन्ति, मरणानन्तरं स्वर्गे पूज्यश्च भवति । पुण्डरीकमहातीर्थे सत्कर्माचरणेन पुण्डरीकयागकृतफलमवाप्नोति । ब्रह्मतीर्थे कृतं सत्कर्म सर्वयागफलप्रदश्च भवति । नदीसमुद्रयो: सङ्गमे, पञ्चनदक्षेत्रे अधिकारिणा जितेन्द्रियस्सन् श्राद्धकर्मानुष्ठानाचरणेन अक्षय्यफलं प्राप्यते । विरजाया:, मद्रवायाश्च नद्या: तीरे विरजमद्रवयो: पर्वतप्रदेशे च श्राद्धाचरणं बहुपुण्यप्रदम् । सप्तनदक्षेत्रे, मानसतीर्थे , महाकूटपर्वते, अनन्तगिरौ, त्रिककुटपर्वते श्राद्धानुष्ठानाचरणेन विशेषफलं लभ्यते । अक्षय्यप्रीतिभावाकाङ्क्षी सन्ध्यानदीतटे श्राद्धाचरणं कुर्यात् । पापात्मानं सा नाभ्येति धृतव्रतं च अभ्येति इति कृत्वा स्वर्गमार्गप्रदं तीर्थं

तत् । तत्र सप्तर्षय: चीराण्युत्सृज्य दिवंगता: । तानि चीराणि अद्यो गतानि अद्यापि पर्वकाले दृश्यन्ते । तत्र तीर्थस्नानेन स्वर्गलोकं प्राप्स्यति ।

श्रीवृक्ष:, चित्रकूट:, जम्बूमार्ग:, योगाचार्यस्य ज्ञानिन: असितमुने: वासस्थानमसितनदीतीरम् । महोदधि, प्रभासक्षेत्रम्, देविकानदीतीरम्, दशाश्वमेध:, पञ्चाश्वमेधक्षेत्रम्, एतेषु श्राद्धकर्मानुष्ठानाचरणेन दशाश्वमेधपञ्चाश्वमेधयागकृतपुण्यं लभ्यते । शीघ्रफलकारिक्षेत्रमिति प्रसिद्धं हयशिरक्षेत्रम् । पापनाशो भवति सुन्दासुन्दक्षेत्रे श्राद्धानुष्ठानेन । नन्दिकेश्वरतीर्थक्षेत्रे नन्दिकेश्वरदेवालय: प्रसिद्धो वर्तते । तस्य वैशिष्ट्यं नाम आचारहीनै: नन्दिकेश्वरमूर्ति: द्रष्टुमपि न शक्या भवति । तत्र सूर्योदयसमये सूर्यरश्मि: सुवर्णमययूपस्तम्भ इति भाति । तत्स्तम्भप्रदक्षणेन नर: साक्षात् ब्रह्मानन्दसुखमेवानुभवति इति प्रसिद्धम् । तादृशतीर्थक्षेत्रे श्राद्धकर्मानुष्ठानाचरणेन शीघ्रस्वर्गावाप्ति:

फलम् । कुरुक्षेत्रे पितॄन् उद्दिश्य तिलदानं यदि क्रियते अनन्तपुण्यं लभ्यते । सरस्वतीनदीतटम्, विनशनक्षेत्रम्, प्लक्षक्षेत्रम्, प्रश्रवणक्षेत्रम्, व्यासतीर्थक्षेत्रम्, दृशद्वतीतीर्थम्, त्रिप्लक्षक्षेत्रम् इत्येतानि तीर्थक्षेत्राणि श्राद्धकर्मार्हाणि इति पुराणप्रसिद्धम् ।

**श्राद्धयोग्यकाला:**

हिमप्रपतने प्रदेशे एव श्राद्धाचरणं कर्तव्यं तस्मात् हिमखण्डमानीय वा। अग्निहोत्रहोमभूमौ श्राद्धाचरणम् अतिपवित्रमिति कीर्तितम् । तेन आयुर्वृद्धिश्च भवति । चन्द्रग्रहणकालं वर्जयित्वा रात्रिश्राद्धानुष्ठानं निषिद्धम् । श्यामाकेक्षुदण्डैः सिद्धं हविः पितृभ्यः यदि दीयते सर्वकामावाप्तिश्च भवति । श्यामाकधान्यैः आग्रायणकर्मानुष्ठानेन नरः शीघ्रं सिद्धिम् अवाप्नोति । प्रियङ्गुः, मुद्गः, हरितः, कृष्णमाशाः, तिलः, यवः, शालिः इत्येते धान्यविशेषाः अपि श्यामाका इव पवित्राः भवन्ति । महायवः, मधूलिका, अन्नलोहः इत्येते धान्यविशेषाः श्राद्धकर्मणि वर्ज्याः भवन्ति ।

वर्षाकाले जायमानाः अतियवः, वृषकः, वासकः, बिल्वः, आमलकः, मृद्विका, पनसः, आम्रः, दाडिमः, इत्येतेषां पत्त्राणि श्राद्धयज्ञे अतिपवित्राणि भवन्ति । तावशः, लंयतः, क्षौद्रः, खर्जूरः, आम्रफलम्, कशेरुः, कोविदारुः, तालकंदः, बिसः, इत्येतानि फलपुष्पाणि अपि श्राद्धार्हाणि भवन्ति । शतकन्दः, मद्वसूः, अन्तकादिकी, कालेयः, कालशाकः, भूरिपूर्णा, सुवर्चला, इत्येतानि अपि उपयोक्तुम् अर्हाणि । मांसाक्षः, दुविशाकः, बुबुचेताङ्कुरः, कफालकः, द्राक्षा, लकुचः, चोचः, इत्येतानि अतीव प्रशस्तानि वस्तूनि श्राद्धकर्मणि । अलाबुः, ग्रीवकः, वीरः, कर्कन्धुः, वैकंकतः, नालिकेरः, श्रङ्गाजपकः, दूषकः, अपि अर्हाः पदर्थाः । पिप्पली, मरीचः, पटोलः, बृहतीफलम्, कषायद्रव्याणि, नागरम्, दीर्घमूलम्, वंशः, करीरः, सुसरः, सर्जकः, भूतृणानि श्राद्धकर्मणि अर्हाः पदार्था इति स्मृताः । लशुनम्, गृञ्जनम्, पलाण्डुः, पिण्डमूलम्, करम्भः, वर्ज्यानि ।

अनिष्टशब्दानां संकीर्णां जन्तुव्याप्तामथाविलाम् ।
पूतिगन्धां तथा भूमिं वर्जयेच्छ्राद्धकर्मणि ॥

सागरपर्यन्तां द्वारम्, दक्षिणपूर्वभागस्थद्वारभूमिः, त्रिशङ्कुदेशः, श्राद्धकर्माचरणे त्याज्याः प्रदेशाः । तदुक्तम्

उत्तरेण महानद्या दक्षिणेन च वैकटम् ।
देशास्त्रिशङ्कोर्नाम वर्ज्या वै श्राद्धकर्मणि ॥ इति ॥

कारस्करः, कलिङ्गः, सिन्धूनद्याः उत्तरप्रदेशः, वर्णाश्रमधर्मरहितप्रदेशः च श्राद्धकर्मानर्हाः प्रदेशाः । नगादिजनाः श्राद्धं कर्म न पश्येयुः । यदि पश्यन्ति श्राद्धफलं पितरः, पितामहाश्च न स्वीकुर्वन्ति ।

सर्वेषामेव भूतां त्रयी संवरणं स्मृतम् ।
तां ये त्यजन्ति संमोहात् ते वै नग्नादयो जनाः ॥
वृषं यस्तु परित्यज्य मोक्षमन्यत्र मार्जति ।
वृषो वेदाश्रमस्तस्मिन् यो वै सम्यक् न पश्यति ॥
वृथा जटी वृथामुण्डी वृथा नग्नश्च यो जनः ।
वृथाव्रती वृथाजपी ते वै नग्नादयो जनाः ॥

कृतकर्मदिशः, कुलधर्मातिगाः, वृत्तिकलत्रगाः, एते कुपथाः श्राद्धकर्मणि निषिद्धाः । एतैः दीयमानं हविः अथवा एतैः दृश्यमानं हविः दानवानाम् अधीनं भवति । ब्रह्मघ्नः, कृतघ्नः, नास्तिकः, गुरुतल्पगः, दस्युः, नृशंसः, पतिताः, क्रूरकर्माणः, देवतानामृषीणाञ्च विवादे ये प्रवदन्ति, देवांश्च ब्राह्मणानां च विवादे ये प्रवदन्ति आम्नायं च यस्तु निन्दति एभिः दृष्टं हविः असुरान् यातुधानांश्च व्रजति । कृतयुगे पितरः विशेषरूपेण पूजिता आसन् ।त्रेतायुगे देवताः विशेषरूपेण पूजिता आसन् । द्वापरायुजे मुनयः विशेषरूपेण पूजिता आसन् । कलियुगे पाखण्डाः विशेषरूपेण पूजिता सन्ति । नपुंसकः, बहिष्कृतः, कुक्कुटः, कुक्कुरः, ग्रामवराहः,

एतेषां दर्शनमात्रेण श्राद्धयज्ञ: ध्वंस: भवति । एतै: स्पृष्टं हवि: श्राद्धानर्हं च भवति । दीर्घरोगग्रस्तजना: पतिता: श्राद्धकर्म न पश्येयु: । गुरुसूर्याग्निवाय्वादिपवित्रवस्तूनां दर्शनम् अवश्यमेव अधिकारी कुर्यात् । अस्विन्नम्, परिदग्धम्, अग्नावलेहितम्, शर्करकीटपाषाणै: केशै: उपाहृतम्, पिण्याकम्, मथितम्, तिलयवादिषु मथितम्, पूर्वमेव सिद्धिकृतानि भक्ष्यभोज्यानि (एकयामसमयातीतानि) प्रत्यक्षलवणीकृता: पदार्था: निषिद्धा: । वेदनिन्दका:, पण्डिताभिमानिन:, अयज्ञमतय:, श्राद्धकर्म नाशयन्ति । तदुक्तम्

सन्ति वेदविरोधेन केचिद्विज्ञाभिमानिन: ।
अयज्ञमतयो नाम ते ध्वंसन्ति यथा रज: ॥इति ॥

दधिशाकम्, औषधिवर्जितम्, वार्ताकञ्च वर्जयेत् श्राद्धे । मानससरोवरसंभवं लवणम्, एवं सैन्धवं लवणं श्रेष्ठम् । एते द्वे पवित्रे निर्दिष्टे चेदपि एतद्धस्ते गृहीत्त्वा अग्निस्पर्शं कृत्त्वा उपयोक्तुं शक्येते । एतादृशवस्तु शिरसि धारयेत् । यतो हि शिरोऽग्रदेश: ब्रह्मतीर्थ इति स्मृत: । तदुक्तम्

गमयेन्मस्तकं चैव ब्रह्मतीर्थं हि तत्स्मृतम् ।
द्रव्याणां प्रोक्षणं कार्यं तथैवावपनं पुन: ॥ इति ॥
निधाय चाद्भि: सिञ्चेत् तत्तथा चाप्सु निवेशयेत् ।
अश्ममूलफलेक्षूणां रज्जूनां चर्मणामपि ॥
वैदलानां च सर्वेषां कूपवच्छौशमिष्यते ॥
तथा दन्तास्थिदारूणां श्रङ्गाणां चावलेखनम् ॥

समस्तमृण्मयपात्राणां जलेन पुन: संस्करणं शौचम् । श्राद्धभूमिं प्रोक्षणेन गोमयादिलेपनेन गोसंचारेण दहनखननेन च संस्कुर्यात् । भूमौ विद्यमान: धूलि: वायुसंचारेण सिद्ध्यति । पुरुषचतुष्पाद्प्राणिनां मृत्तिकया शुद्धि: । शौचविशये यस्य श्रद्धा नास्ति स: म्लेच्छजातौ जन्म प्राप्नोति ।

श्राद्धसमये लब्धातिथये क्षीरसमर्पणेन अग्निष्टोमयागफलं प्राप्नोति । पायससमर्पणेन उक्थ्ययागफलम् अनुभवति । घृतसपर्पणेन षोडशीयागकृतपुण्यफलभाक् भवति । मधुसत्कारेण अतिरात्रयागानुष्ठानफलभाक् भवति । श्रद्धावान् सर्वकामनया अतिथिभोजनकरणेन सर्वमेधायागफलं च प्राप्नोति । देवपितृकर्मप्रसङ्गे अतिथ्यवमानेन नर: नरकं गच्छति । देवा: पितरश्च स्वान्तर्धानस्त्तया अदृश्या: भूत्वा अतिथिस्वरूपेण विप्रे प्रविश्य लोकानुग्रहाय यजमानेन दीयमानं द्रव्यं स्वीकुर्वन्ति । नरै: अपूज्यमाना: अतिथय: तस्य सर्वस्वं भस्मसात् कुर्वन्ति । नरै: पूज्यमाना: अतिथय: सर्वकामान् पूरयन्ति । पाकारम्भसमये आगता: अभ्यागता इति पाकसमाप्तिसमये आगता अतिथय इति गीयते । तदुक्तम्

अभ्यागत: पाकाचारादतिथि: स्यादपावक: ॥इति ॥

व्रतानुष्ठानशून्य: सङ्कीर्ण: विद्याविहीन: विशेषज्ञानरहित:, सन्ततिसम्बन्धी, सेवक:, अपराधे दृष्टियुक्त:, अतिथिसत्काराय अनर्हा: भवन्ति । पिपासित:, श्रान्ता:, भ्रान्ता:, अतिबुभुक्षिता:, एतान् सत्कृत्य दद्यात् एवं करणेन बहुयज्ञकृतपुण्यफलं लभ्यते । क्लेशवर्जितम्, व्रणरहितम्, योगिनम्, अल्पजीवकम्, अयाचितारम्, एकान्तशीलम्, ज्ञानिनं सत्पात्रं श्राद्धे सर्वदा भोजयेत् । सर्वविप्रेषु यति: अग्रपूजार्ह:, तस्याभावे चतुर्वेदी ब्राह्मण: श्रेष्ठ:, तस्याभावे त्रिवेदी, तदभावे द्विवेदी, तस्याभावे एकवेदी, तस्याभावे उपाध्याय: अर्ह: भवति । शिक्षादिषडङ्गज्ञ:, ध्याननिरत:, योगी, सर्वतन्त्रनिष्णात:, यति: एते पञ्च पङ्क्तिपावना: भवन्ति । समग्रतया श्राद्धकल्पं य: सम्यक् जानाति तस्य सानिध्येनैव श्राद्धकर्म सफलं भवति । चतुर्दशविद्यासु एकस्यां विद्यायां पारङ्गतश्चेदपि तस्य सान्निध्येन पङ्क्तिपावन: भवति । शास्त्रविधौ अनुष्ठानतत्परा: सर्वेऽपि पङ्क्तिपावना: भवन्ति । त्रिसुपर्णमन्त्राध्यायिन:, पञ्चाग्न्युपासका:, सामवेदाध्यायिन:, बृहस्पतिप्रणीतशास्त्रे पारंगत: विप्र:, ध्याननिष्ठम्, दयायुतम्,

ज्ञानवन्तम्, यतिम् अथवा वालखिल्यं महात्मानम् आमन्त्र्य श्राद्धयज्ञे भोजयेत्, एते सर्वेऽपि पङ्क्तिपावना: भवन्ति । वानप्रस्थाश्रमिणं ग्रहस्थं ये भोजयन्ति तेन वैश्वेदेवा: पूजिता: प्रसन्नाश्च भवन्ति । वानप्रस्थाश्रमिण: पूजनेन ऋषय:, वालखिल्यार्चनेन इन्द्राश्च प्रसन्ना: भवन्ति । यतीनां पूजनेन साक्षात् ब्रह्मदेवस्य पूजनं कृतम् इव भवति । श्राद्धे देवकर्मणि च चतुराश्रमिण एव पूज्या: भवन्ति । चतुराश्रमं विहाय पञ्चमाश्रमे विद्यमाना: पूजार्हा: नैव बवन्ति । वायुभक्ष्यादिक्लेशसाध्यमहातप: कुर्वन् चतुराश्रमबाह्य: श्राद्धे यज्ञे भोजनदानादिसत्काराय अयोग्य एव भवति । अयति: अपि तु मोक्षवादी पङ्क्तिपावन: न भवति । उग्रतपसा युक्ता: बहुज्ञा:, चित्रवादिन: अपि द्विजातिभ्य: निन्दन्ति चेत् ते पङ्क्तिदूषका: भवन्ति । असांख्या:, नास्तिका:, शास्त्रविहितध्यानमार्गं भिन्नदृष्ट्या ये दूषयन्ति ते पङ्क्तिपावना: नैव भवन्ति । वृथा मुण्डा: जटाश्च, कार्पाटका: भिन्नवृत्ता:, सर्वभक्ष्या: पङ्क्तिदूषका: भवन्ति । लोकवेदबहिष्कृता:, रजक:, शिल्पकर्मचतुर:, आचाररहित: पुरुष:, गायक:, एतान् हव्यकव्यकर्मणि वर्जयेत् । सूद्रेण सह य: भुङ्क्ते सोऽपि पङ्क्तिदूषक:। मिथ्यासंकल्पी, उद्धृत्त:, मिथ्याप्रवादी, निन्दाकृत्, सूचक:, दांभिक: श्राद्धकर्मणि वर्ज्या: । उपपातकसंयुक्ता:, पातकै: संयुक्ता:, लोभमोहफलार्थिन:, वेदाध्ययने नियोगदातार: श्राद्धे बहिष्कृता: भवन्ति । क्रयविक्रयवृत्तिविशिष्टा: द्विजा: अनर्हा: भवन्ति । वृथा दारान् यो गच्छेत्, वृथा यो यजेताध्वरै: तावुभावपि नार्हत: । अपि च

अर्थकामरताश्चैव न तान् श्राद्धेषु भोजयेत् ।
वर्णाश्रमाणां धर्मेषु विरुद्धा: सर्वकर्मणि ॥
स्तेनश्च सर्वमयाजी च सर्वे ते पङ्क्तिदूषका: ।
यश्च सूकरवद्भुङ्क्ते यश्च पाणितले द्विज: ।
न तदश्नन्ति पितरो यश्च वाश्यं समश्नुते ॥
स्त्रीशूद्रायान्नमेतद्वै श्राद्धोच्छिष्टं न दापयेत् ॥
मोहेन श्राद्धकर्मणि अवशिष्टान्नादि नेतरेभ्यो दापयेत् ॥ इति ॥

यदि दीयते पितर: सन्तुष्टा: नैव भवन्ति । अत: श्राद्धोच्छिष्टान्नदानं न कुर्यात् । दधिघृतादीनि एव श्राद्धोच्छिष्टानि न किन्तु श्राद्धावशिष्टान्नपानादीन्यपि । एतानि पुत्राय दद्यात् अन्येभ्य: नैव दद्यु: । यावत् पर्यन्तम् अन्नम् औष्ण्यं तिष्ठति तावत् पर्तन्तं पितर: तदन्नं भुञ्जते । आमन्त्रिता: द्विजा: यावत्पर्यन्तं मौनेन भुञ्जते तावत्पर्यन्तमेव पितर: हविर्भोजनं कुर्वन्ति । दानप्रतिग्रहहोमभोजनबलिकर्माणि साङ्गुष्ठपाणिना आचरेत् । अपि च विप्रेभ्य: पाद्यं साङ्गुष्ठपाणिना समाचरेत् । अनेन विधिनाचरितं कर्म राक्षसानां वशं न भवति ।

ये तु वृते स्थितां नित्यं ज्ञानिनो ध्यानिनस्तथा ।
देवभक्ता महात्मान: पुनीयुर्दर्शनादपि ॥
सर्वं योगेश्वरैर्व्याप्तं त्रैलोक्यं हि निरन्तरम् ।
इति श्राद्धे आमन्त्र्य योग्यानां कीर्तनं क्रियते ॥
ते च योगिब: सर्वं यत्किञ्चित् जगतीगतम् ।

व्यक्ताव्यक्तं वशे कृत्वा सर्वस्यापि यत्परं तत्पश्यन्ति तादृशमहात्मभि: सत्यासत्यम्, सदसत्, च दृष्टम् । सर्वज्ञानानि सर्वमोक्षादीनि दृष्टानि । अत: तेषां भक्त: सदा फलम् उत्तमोत्तमं प्राप्नोति ।

ऋचश्च यो वेद स वेद वेदान् यजूंषि यो वेद स वेद यज्ञम् ।
सामानि यो वेद स वेद ब्रह्म यो मानसं वेद स वेद सर्वम् ॥
इति एतादृशा: श्राद्धे आह्वातव्या: ।

**श्राद्धविधौ दानप्रशंसा**

श्राद्धकर्मणि द्विजेभ्य: प्रभूतम् अन्नदानं करोति चेत् सुवर्णकान्तिभि: समलङ्कृत्य सूर्यसदृश: भूत्वा अप्सरोभि: स्त्रीभि: दिव्यविमानं शाश्वतं प्राप्नोति । सव्यञ्जनं यो दद्यात् श्राद्धकर्मणि आयु:, प्राकाश्यम्, ऐश्वर्यम्, शुभम्, रूपं च लभते । श्राद्धकाले यज्ञोपवीतं यस्तु यज्ञवित् दद्यात् पावनं सर्वविप्राणां ब्रह्मदानस्य तत् फलं

कीर्तितम् । मधुक्षीराज्यदधिभिः युतं कमण्डलुं विप्रेभ्यः श्राद्धकाले यदि दीयते दातारं प्लुतं सर्वकालेषु उपतिष्ठते । तक्रपूरितकमण्दलुं यदि ददाति दिव्यां पयोदां सुखदोहिनीं धेनुं सः लभते । तूलं पादुके च यः ददाति सः शुभकरयानं प्राप्नोति, पादयोः सुखमेधते । तालवृन्तं व्यञ्जनं यो ददाति विप्राय सत्कृत्य सुगन्धीनि मृदूनि पुष्पाणि प्राप्नुयात् । ज्ञानी बुधः द्विजेभ्यः पादरक्षादानमहिम्ना वाजियुक्तं नवं दिव्यं यानं लभते । पुष्पमालादिना अर्चयित्वा यः द्विजाय छत्रं ददाति तत्फलम् उत्तमः प्रासादो भूत्वा गच्छन्तम् अनुगच्छति । रत्नसम्पूर्णं सशय्याभोजनं यः प्राज्ञः दानत्वेन करोति तद्दानफलं स्वर्गे सुखत्वेनानुभवति । गृहदानेन रत्नवैडूर्यदिव्यानि वाहनानि प्रयुतानि अर्बुदानि चानुभवति । अपि च सर्वकामसमन्वितं पुण्यं चन्द्रसूर्यनिभं दिव्यं विमानं लभते । तच्च विमानम् अप्सरोभिः युतं स्वेच्छाधीनसंचारयुतं अतिवेगि च भवति तादृशं सुखं प्राप्नोति । दानेषु सुवर्णपात्रदानेन दाता दिव्यरसम्, भक्ष्यम्, सौभाग्यफलं च प्राप्नोति । इक्षुदण्डफलदानेन दाता बहुमित्रम्, स्वस्त्रीभ्यः सौभाग्यं चार्जयति । सुवर्णदानेन रजतदानेन च इष्टकामान् धनानि च प्राप्नोति । कुम्भापदोहिनीं धेनुं गृष्टिं यदि ददाति गोसन्ततिः तस्य कुले असंख्याकाः भवन्ति । शिशिरौ भूयिष्ठकाष्ठदानेन जठराग्निदीप्तिम् शरीरकान्तिम्, सौभाग्यञ्च प्राप्नोति । अपि च तद्दतौ इन्धनदानमपि अतीव प्रशस्तमिति स्मृतम् । सुगन्धपुष्पगन्धमाल्यदानेन दातारं परितः स्त्रियः सर्वदा सञ्चरन्ति । उपर्युक्तवस्तुदानेन अश्वमेधयागाचरणफलं प्राप्नोति । श्राद्धकाले सद्गुणसम्पन्नविप्रागमने तं स्वागतीकृत्य तस्मै यदिष्टं हव्यं दद्दानेन कीर्तिलाभं प्राप्नोति । पुष्पफलैः समलङ्कृत्य वनदानेन गोसवयागस्य फलं प्राप्नोति । वनदानमिव कूपतडागगोष्ठदानान्यपि श्रेष्ठप्रदानि भवन्ति । एतद्दानेन दाता चन्द्रतारकाणि यावत्पर्यन्तं भवन्ति तावत्कालं स्वर्गे चिरं तिष्ठति । रत्नैः समलङ्कृतवस्त्रास्तरणेन युतां शय्यां ददाति तर्हि पितृदेवताः अतीवसन्तुष्टाः भूत्वा एतद्दातृपुरुषः स्वर्गं गच्छेत् इति आशिषानुगृह्णन्ति । अपि च रथादियानसौभाग्यं चानुभवति । अपि च अष्टैश्वर्यैः धनधान्यैः वृद्धिं प्राप्य इह लोके परलोके च पूज्यो भवति । अजिनम्, कांचनम्, पट्टम्, प्रवेणीम्, मृगलोमकम्, एतानि दत्त्वा विप्रान् यथाविधि भोजयेत् । तेन वाजपेययागफलम्, बहुभार्याः, सुरूपांश्च पुत्रान्, भृत्यांश्च किंकरांश्च प्राप्नोति । सर्वभूतान्यपि अस्य वशगाः भवन्ति । अत्र लोके निरामयः तिष्ठति ।कौशेयम्, क्षौमकार्पासम्, दुकूलदानेन सर्वकामेन सह विशेषतया श्रीलक्ष्म्यनुग्रहं च प्राप्नोति । विना वस्त्रं यज्ञदानतप आदि यत्किञ्चिदपि सत्कर्म नैव भवति । अतः पितृभक्तिपूर्वकम् उत्तमवस्त्रदानं नित्यश्राद्धेऽपि कर्तव्यम् । एतेन प्रभावेण राज्यम्, स्वर्गम्, सर्वकामप्राप्तिं

चानुभवति । केवलवस्त्रदानेनैव सकलयज्ञानुष्ठानफलं समस्तकामोपभोगं चानुभवति । शर्कराभक्ष्यम्, मधु, आज्यम्, क्षीरम्, पायसम्, इत्यादि पितृभ्यः निवेदनेन पितृणां प्री

तिभाग्भवति । स्निग्धयुतं क्षीरं योददाति अग्निष्टोमफलं च सः लभते । वर्षाकालश्राद्धे मघानक्षत्रे क्रियमाणं श्राद्धं दध्यादिद्रव्यदानेन न शोभते । हस्तिच्छायायां श्राद्धं कृत्वा अन्नपयोघृतादिदानेन कदापि शोकभाक् न भवति । पितृदेवताः क्षीरसहितपृथुकं सर्वदा कामयन्ते अतः तादृशपृथुकनिवेदनेन पितरः सुप्रसन्नाः भवन्ति ।श्राद्धे विप्रं सत्कृत्य प्रयत्नपूर्वकं नूतनधान्यं यदि तेभ्यः समर्पयति तदा इह लोके परलोके च समस्तभोगं अनुभूय स्वर्गे पूजितो भवति । बुभुक्षिताय विप्राय क्षिप्रमत्युष्णमन्नं यदि ददाति सर्वयज्ञक्रतूनां फलमवाप्नोति । तदुक्तम्

सर्वयज्ञक्रतूनां हि फलं प्राप्नोत्यनुत्तमम् ।
क्षिप्रमत्यु..क्लिष्टं दद्यादन्नं बुभुक्षवे ॥
सव्यञ्जनं तथा स्निग्धं भक्त्या सत्कृत्य यत्नतः ।
तरुणादित्यसंकाशं विमानं हंसवाहनम् ॥
अन्नादो लभते नित्यं कन्याकोटीस्थैव च ।
अन्नदानात् परं दानं नान्यत् किञ्चित्तु विद्यते ।

इत्यादिभिः श्लोकैः अन्नदानस्य माहात्म्यं प्रतिपाद्यते । अत्र श्राद्धप्रकरणदानविषये ।

अन्नाद्भूतानि जायन्ते जीवन्ति प्रभवन्ति च ।
जीवदानात् परं दानं नान्यत् किञ्चन विद्यते ॥
अन्नाल्लोकाः प्रतिष्ठन्ति लोकदानस्य तत्फलम् ।
अन्नं प्रजापतिः साक्षात्तेन सर्वमिदं ततम् ॥
तस्मादन्नसमं दानं न भूतो न भविष्यति ।
यानि रत्नानि मेदिन्यां वहनानि स्त्रियस्तथा ॥
क्षिप्रं प्राप्नोति तत्सर्वं पितृभक्तस्तु यो नरः ।

एवमतिथिं सभक्तिश्रद्धं नमस्कृत्य कृताञ्जलिः प्रतिश्रथं दद्यात् । तादृशं नरं सहस्रशः दिव्यातिथ्यैः देवा अपि पश्यन्ति । तथा च श्रूयते

सर्वाण्येतानि यो दद्यात् पृथिव्याम् एकराड्भवेत् ।
त्रिभिर्द्वाभ्यामथैकेन दानेन तु सुखी भवेत् ॥
दानानि परमो धर्मः सद्भिः सत्कृत्य पूजितः ।
त्रैलोक्यस्याधिपत्यं हि दानेनैव ध्रुवं स्थितम् ॥
अराजा लभते राज्यमधनश्चोत्तमं धनम् ।
क्षीणायुर्लभते चायुः पितृभक्तः सदा नरः ॥

## उपयुक्तग्रन्थानां सूची


1. कूर्मपुराणम् व्यासमहर्षिः आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम् १८९४
2. गरुडपुराणम् व्यासमहर्षिः आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम् १८९४
3. चतुर्वर्गचिन्तामणिः हेमाद्रिशर्मा चौखम्बा संस्कृत सीरीज्, वाराणसी १९८५
4. तिथिनिर्णयः भट्टोजीदीक्षितः चौखम्बा संस्कृत सीरीज्, वाराणसी १९४०
5. देवी भागवत हिन्दी व्याख्या भागवतप्रसाद द्विवेदी मौजीराम स्मृति न्यास नई दिल्लि, ११००३४ १९९९
6. धर्मसिन्धुः निर्णयसागरम् १९९८
7. निर्णयसिन्धुः कमलाकरभट्टः निर्णयसागरमुद्रणालयः, मुम्बई १९४९
8. पद्मपुराणम् व्यासमहर्षिः आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम् १८९४
9. पद्मपुराणम् व्यासमहर्षिः आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम् १८९४
10. पद्मपुराणम् महादेव चिमणाजी आपटे पुण्तपत्तनम् आनन्दाश्रममुद्रणालयः १८९४
11. पुरुषार्थचिन्तामणिः विष्णुभट्टः निर्णयसागरः, मुम्बई १९२७
12. पुरुषार्थसुधानिधिः सायणाचार्यः जि. ओ. एम्. एल्. मद्रास् १९५५
13. प्रश्नमार्गम् कव्याडी कव्याडि मठ् पर्कल २०१०
14. ब्रह्मपुराणम् व्यासमहर्षिः आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम् १८९४
15. ब्रह्मवैवर्तपुराणम् व्यासमहर्षिः आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम् १८९४
16. ब्रह्माण्डपुराणम् व्यासमहर्षिः आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम् १८९४
17. भविष्यपुराणम् व्यासमहर्षिः आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम् १८९४